# चिन्मय प्रतिज्ञा

सर्वे वयं गोत्रमिव स्म एकं प्रेमादरश्लक्ष्ण गुणानुबद्धाः ।
योद्धुं सदा चाखिल दुष्प्रवृत्तीः सेनेव सिद्धा नियताश्च धीराः ॥१॥

वयं सर्वे एकं गोत्रम् इव प्रेम आदर श्लक्ष्ण गुणानुबद्धाः स्म ।
सदा सेना इव नियताः सिद्धाः धीराः अखिल दुष्प्रवृत्तीः च योद्धुं च (स्म) ।

सेवापरित्यागमयायुषा च प्रतिग्रहेभ्योऽधिकमेव दानम् ।
मनस्वितासद्गुण धैर्यमार्गे त्रातुं प्रसादाय भजाम ईशं ॥२॥

सेवा-परित्यागमया आयुषा च प्रतिग्रहेभ्यः अधिकमेव दानम् (आयुषा) मनस्विता-सद्गुण धैर्यमार्गे त्रातुं प्रसादाय ईशं भजाम ।

प्रभो कृपा ते च शुभाषिशोऽस्मद् द्वाराभितोऽस्मिन् जगति स्रवन्तु ।
स्वदेशसेवैव च देवसेवा सदेति भोः विश्वसीमो दृढं च ॥३॥

प्रभो! ते कृपा च शुभाषिशाः अस्मिन् जगति अभितो अस्मद् द्वारा स्रवन्तु
भोः! स्वदेशसेवा ईव च देवसेवा सदेति विश्वसीमः दृढं च

जनेषु भक्तिः परमात्म भक्तिः इति स्वकार्याणि च सुष्ठुं विद्मः ।
तेषां प्रपूर्त्यै कृपया प्रभो नो बलं च धैर्यं वितरोपयुक्तम् ॥४॥

जनेषु भक्तिः परमात्म भक्तिः स्वकार्याणि इति च सुष्ठुं विद्मः ।
प्रभो! तेषां प्रपूर्त्यै कृपया नः बलं च धैर्यं वितरोपयुक्तम् ॥

ॐ तत् सत् ॥